# Uma Sahasranama Stotram

# उमासहस्रनामस्तोत्रम्

## Document Information

Text title : Uma Sahasranama stotram

File name : umAsahasranAmastotram.itx

Category : sahasranAma, devii, devI, pArvatI, stotra

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Latest update : June 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 6, 2025

*sanskritdocuments.org*

# उमासहस्रनामस्तोत्रम्

ॐ

ॐ नमः उमा भगवत्यै ।
उमा उषा च वैदेही रमा गङ्गेति पञ्चकम् ।
पठेन्नित्यं स्मरेत् वापि-घोरसङ्कट-नाशकम् ॥

## प्रस्ताविका

दुष्टानार्य कृताद घोरादुपद्रव विपदभरात् ।
स्वधर्मरक्षाहेत्वर्थत्यक्तकश्मीरमण्डलः ॥ १॥

देव्या उमाया सद्भक्त स्वयमानन्दसाधक ।
प्राचारयञ्जगन्मातु पूजां जम्बूपुरे पुनः ॥ २॥

मुट्ठीस्थले सुनिर्माय मन्दिर सुमनोरमम् ।
जलकुण्डसमायुक्तं शोभनं सुपरिष्कृतम् ॥ ३॥

समस्तपूजा सामग्रीयुतं पूजकसेवितम् ।
प्राचारयदुमा देव्याः पूजन विधिपूर्वकम् ॥ ४॥

पूजार्थ निरमाद्देव्यास्तंव नामसहस्रकम् ।
प्राचारयच्च तद्भक्तया पाठ होम कृते स्वयम् ॥ ५॥

संस्कारमकरोत्रस्य मनाक् शास्त्रीयदृष्टितः ।
पण्डित बलिजन्नाथ स्वयम्मानन्द प्रेरिता ॥ ६॥

आधन्तं वृच्यनुप्रास मधुरं सुमनोरमम् ।
चित्तैकाग्रयकंर श्रव्य भक्ति पीयूष सम्प्लुतम् ॥ ७॥

जम्बूपुरस्य पाश्रचात्यै मुठीति विश्रुते ।
रूपनगरस्थले तिष्ठन् स्वयमानन्द सन्मुनि ॥ ८॥

उमा देव्या सुभक्तः सन तत्कथाश्रावयनमुदा ।
आसीच्छिठय सभामध्ये तारकास्विचन्द्रमाः ॥ ९॥

तत्र कृष्णाभिधा शिष्या देवी भक्तिपवित्रिता ।
गुरू सम्प्रार्थयामास वक्तुं नाम सहस्रकम् ।
उमा देव्या परं पुण्यं सर्वसिद्धिप्रदं शिवम् ॥ १०॥

कृष्णोवाचः -
भगवन् परमानन्दस्वरूप मुनिसत्तम ।
उमा देव्याः महाभक्त प्रार्थना पूरयस्व मेम् ॥ ११॥

मुनिरुवाचः -
प्रार्थना कास्ति ते देवि कः प्रश्न वद निर्भया ।
यथा बुद्धि यथा शक्ति तोषयिष्यामि वः शिवे ॥ १२॥

कृष्णोवाचः -
भगवन् सर्वदेवानां स्तुति जातेषु सत्स्वार्प ।
उमा देव्या स्तवं नाम साहस्रं नैव लभ्यते ॥ १३॥

कृपया ब्रूहि तन्नाथ उमा भक्तो ॥ १४॥

मुनिरुवाचः -
श्रृणुदेवि जगन्मातुरूमा देव्या स्तवं परम् ।
नाम साहस्रकं पुण्य यज्ञनैर्ज्ञायते न हि ।
कलिकाले शिवं तं वै कथयामि तवाधुना ॥ १५॥

अस्यनाम सहस्रस्य पाठेन गिरिजा शिवा ।
सन्तोष याति कुशल क्षेम चापि करोति सा ॥ १६॥

## मूलमन्त्रः

ॐ अस्य श्री उमा भगवती मन्त्रस्य श्रीभैरवऋषिः
अनुष्टुप्छन्दः श्री उमाभगवती देवता ह्रीं बीजं श्रीं शक्तिं
हूं कीलकं आत्मनो वाङ्ग्मन कायोपार्जित पाप निवारणार्थं
सकलकामना सिद्यार्थे श्री उमा भगवती प्रीत्यर्थे जपे विनियोगः ॥

## न्यासः

अथ ऋष्यादिन्यासः ।
भैरव ऋषये नमः शिरसि ।
अनुष्टुप्छन्दसे नमो मुखे ।
उमा-भगवती-देवतायै नमो हृदि ।
ह्रीं बीजाय नमो नाभौ ।
श्रीं शक्त्ये नमो गुह्ये ।
हुँ कीलकाय नमः पादयोः ।
नमः सर्वाङ्गेषु ॥

अथ करन्यासः ।
ह्रीं अङ्गुष्ठाभ्यामं नमः ।
श्रीं तर्जनीभ्यां नमः ।
हुं मध्यमाभ्यां नमः ।
उमा अनामिकाभ्यां नमः ।
भगवत्यै कनिष्ठिकाभ्यां नमः ।
करतलकरपृष्ठाभ्यां नमः ।
अथ हृदयादि न्यासः ।
ह्रीं हृदयाय नमः ।
श्रीं शिरसे स्वाहा ।
हुं शिखायै वषट् ।
उमा कवचाय हुम् ।
भगवत्यै नेत्रयोः वौषट् ।
नमः अस्त्राय फट् । इतिन्यासः ॥

## प्राणायामः कुर्यात्

## ध्यानम्

सुधाकलश सप्पुष्पा मालाहस्ता सुशोभना
आकाश मातरः कुर्यु वर्कत्रं देवस्य सम्मुखम् ॥

## गायत्री

ॐ ह्रीं उमा देव्यै विद्महे श्रीमहामायायै धीमहि हुं तन्न उमा प्रचोदयात् ।

## मूल्मन्त्र

ॐ ह्रीं श्रीं हुं उमा भगवत्यै नमः । (१०८ बार)प्राणायाम पूर्णन्यासः तर्पणाम् ।

## ध्यानम्

आनन्दसुन्दर पुरन्दर मुक्तमाल्यं
मौलौहठेन निहितं महिषासुरस्य ।
पादाम्बुजं भवतु मे विजाय मञ्जुं
मञ्जीरशिञ्जित मनोहरम्बिकाया ॥

## अथ सहस्रनामस्तोत्रम्

Chant ॐ नमः उमा भगवत्यै । after each verse.
ॐ नमः उमा भगवत्यै ।
ध्यानम् (१-)
माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी
मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी ।
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रीङ्कारी त्रिपुरा परामरमयी माता कुमारी त्यसि ॥

ॐ अम्बाज्जरा तथाव्यक्ता अजासामृतवर्षिणी ।
अर्पणाऽकोपनादेवी याऽनेकासुरघातिनी ॥ १॥

आचार्या चाप्यमावस्या यानन्दाऽनन्तरूपिणी ।
अमृता चात्यनाधारा याऽजितासाखिलेश्वरी ॥ २॥

अनादिनिधना आग्नेयी यारविन्दमुखी शिवा ।
अनन्ता चान्नपूर्णा या अण्डमुण्डोपरिस्थिता ॥ ३॥

अरागाऽहङ्कृति देवी रतिर्रागविवर्धिनी ।
अघोराशाकरी देवी याष्टभैरवसेविता ॥ ४॥

आत्मविद्या आत्मशक्ति यार्सत्यात्मप्रबोधिनी ।
अप्रमेया ह्यनाक्रान्ता ह्यनघाऽकुंशधारिणी ॥ ५॥

अन्तर्मुखसमाराध्यानेकवर्णाऽम्बिका शिवा ।
आश्चर्यचरिता सत्शोभा याऽलक्ष्या यार्थसाधना ॥ ६॥

अर्धेन्दुशोभिता देवी याऽज्ञेयानेकरूपिणी ।
अक्षमालाधरा देवी या सदैवपराजिता ॥ ७॥

अग्रगण्या तथाचिन्त्या अन्नदाऽभयदायिनी ।
अष्टादशभुजादेवी याऽजन्माऽसुरनाशिनी ॥ ८॥

अस्त्रशस्त्रमयीविद्या या अनेकास्त्रप्रहारिणी ।
अपराधक्षमाकत्री अक्रूराम्बरवासिनी ॥ ९॥

आनन्दकलिकादेवी अष्टसिद्धिप्रदायिनी ।
अनन्तविक्रमा धीरा याष्टमुर्तिः कृपा-परा ॥ १०॥

आबालगोपविदिता अव्याजकरुणामयी ।
अज्ञानध्वान्तदलिनी ज्ञानालोकप्रदायिनी ॥ ११॥

अनेककोटिब्रह्माण्डजननी या आराध्यरूपिणी ।
अकुंशदिप्रहरणाऽकुला या सदैवकुलपूजिता ॥ १२॥

अक्षक्रीडारर्तिदेवी या ह्यथज्ञानविनाशिनी ।
अश्वप्लुतिस्त्णुरूपा याऽमूर्तात्युत्तमाऽजिता ॥ १३॥

अष्टमी याऽमृतवपुर् यामृताहारदायिनी ।
आघूर्णारूणनेत्रा या आज्ञाचक्रान्तरालया ॥ १४॥

अमृताऽमृतदृष्टिर्या आहारपरिणामिनी ।
आदिशक्त्यविनाशा आत्मदर्शनकारिणी ॥ १५॥

अयोध्या हीश्वरी सेच्छा अमलाऽऽकाशरूपिणी ।
इन्दिरेन्दुरिडा चैव याम्बुजाशीन्द्रवल्लभा ॥ १६॥

ध्यानम् (१०१-) -
लक्ष्मीवशीकरणचूर्ण सहोदराणि ।

त्वत्पादपङ्कजरजांसि चिरं जयन्ति ॥

यानिप्रणामिमिलितानि नृणां ललाटे ।
लुम्पतिदैवलिखितानि दुरक्षराणि ॥

इन्द्राणीपतिसद्भाव पूजितेशानवल्लभा ।
इच्छा ज्ञानक्रियारूपा ह्रीङ्कारा वरदायिनी ॥ १७॥

उमा उषा तथोङ्कारा या सदोदयकीर्तिदा ।
उपासनोद्यमाख्या सा योपचारपरोत्कटा ॥ १८॥

ऋतुः ऋतुप्रिया कर्त्री ऋतुयुक्ता ऋतूद्भरा ।
ऋषिमाता च ऋग्वेदा ऋषिदेवनमस्कृता ॥ १९॥

एकाक्षरा एकमात्रा एकनिष्ठैकवल्लभा ।
एकाकारानेकवर्णा ऐन्द्री चैकादशी शिवा ॥ २०॥

ऐहिकामुष्मिकस्यापि दात्री चैकाररूपिणी ।
एकाऽनेकामहेज्या च एकवर्णसमायुता ॥ २१॥

ओङ्कारस्था परादेवी औषधीरोगनाशिनी ।
ओताप्रोता तथोङ्कारस्वरूपा सर्वरूपिणी ॥ २२॥

कामाख्या कामदादेवी कदम्बतरूवासिनी ।
कविपूज्या च कविता सर्वकामप्रदायिनी ॥ २३॥

कमलेसंस्थिता काली कौलिनी कौण्डली शिवा ।
कदम्बकुसुमैस्तुष्टा कल्याणी करुणानिधि ॥ २४॥

कलावती कलालापा कला कादम्बरीप्रिया ।
करुणारूपिणी कीर्ति कमलाक्षी कुमारिका ॥ २५॥

कामेश्वरी कामजननो कर्माकर्मफलप्रदा ।
कुशला कामनाकारा कुरूकुला कुलेश्वरी ॥ २६॥

कुलकुण्डालया कान्ति कालिन्दी च कलानिधि ।
कान्तिमयी कालहन्त्री कोशदा कामवन्दिता ॥ २७॥

कलात्मिका कलानाथा काव्यालापविनोदिनी ।
क्लीङ्कारा केवला कान्ता केलि कामकलात्मिका ॥ २८॥

कंलकरहिता कौला कामरूपनिवासिनी ।
कान्तार्धविग्रहा काष्ठा कल्पनारहिता केषा ॥ २९॥

करणं कारणं कर्त्ता काराबन्धविमोचिनी ।
कामिनी कौशिकी क्रान्तिः किशोरी कुसुमप्रिया ॥ ३०॥

कुरूक्षेत्रावनि काशी कान्तिदा कुण्डलप्रिया ।
कृष्णा कालुष्यरहिता कला या कलिनाशिनी ॥ ३१॥

ध्यानम् (२०१-) -
किं किं दुःखं दनुजदलिनि क्षीयते न स्मृतायाम् ।
का का कीर्तिं कुलकमलिनि ख्यायते न स्तुतायाम् ।
का का सिद्धि सुरवनुते प्राप्यते नार्चितायाम् ।
कं कं योगं त्वये न चिनुते चित्तमालाम्बितायाम् ॥

काकरूपा कान्तिमती काशीपुरमहेश्वरी ।
कुण्डासना कलारूपा काश्मीरपुरवासिनी ॥ ३२॥

कामेशमहिषी काम्या कामेशी काकलीप्रिया ।
कुमारगणनाथाम्बा काकिनीदामधारिणी ॥ ३३॥

काश्मीरजेनलिप्ताङ्गी मुदाकुमुदमालिनी ।
कालचक्रभ्रमाऽभ्रान्ता कोशस्था कोशवर्धिनी ॥ ३४॥

कुलवागीश्वरीकाली कालभूः कालवर्तिनी ।
कौशम्बी कर्मनाशा च कालिन्दी कलवाहिनी ॥ ३५॥

कर्पूरामोदमिःश्वासा कालीकहलारधारिणी ।
कपालकुण्डलादेवी कायस्था कायवर्जित ॥ ३६॥

कलौकल्किप्रिया कौला कृत्तिवस्त्रा कृपालुका ।
करालवदनाक्रूरा करालदशनानना ॥ ३७॥

कुलविद्या च कीनाशी काश्मीरी कर्मकारिणी ।
कामबीजवती कौला कौमुदी सु कविप्रिया ॥ ३८॥

कर्माकर्मविवर्जिता सा विचित्ररचनाकरी ।
सम्पूर्णचन्द्रवदना काम्या कामवर्धिनी ॥ ३९॥

कदली चैव कावेरी काञ्ची काली कवित्वदा ।

कृपाढ्या क्रियारूपा करालास्येव केसरी ॥ ४० ॥

करिप्रिया कृष्णवर्णा करिक्रीडाकरी मुदा ।
कलहसङ्गतिः कान्ता कर्मनिर्मूलकारिणी ॥ ४१ ॥

कर्पूरलेपना क्रीडा किराती कौशिकीनुता ।
केतकी करिणीन्द्रां च कोटित्रयोशयाम्बिका ॥ ४२ ॥

कृतकौतुकमाङ्गल्या कस्तूरी तिलकाञ्चिता ।
कुलामृतैकरसिका कौलिनी कुलकुण्डला ॥ ४३ ॥

खटवाङ्गधारिणीखटखा खगराजोपरिस्थिता ।
खण्डाख्यानप्रदा ख्यातिः खेचरी खगनामिनी ॥ ४४ ॥

गङ्गा गणेशजननी गायत्री गोमती नदी ।
गम्भीरा चैव गान्धारी गणनाथागर्तिगुहा ॥ ४५ ॥

गोविन्दगीता सा गाथा गुणत्रयविभाविनी ।
गान्धर्वी गह्वरी गोत्रा गुरूमण्डलरूपिणी ॥ ४६ ॥

गुहावासा गुणवती गुरूरूपा गुरूप्रिया ।
गिरिजा गुरूपुत्री च गुडान्नप्रीतमानसा ॥ ४७ ॥

ध्यानम् (३०१-) -
अजानन्तो यान्ति क्षयमवशमन्योन्यकलहै-
रमोमायाग्रन्थौ तव परिलुठन्तः समयिनः ।
जगन्मातजन्मज्वरभयतमः कौमुदि! वयं
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम ॥

गोदावरी गण्डकी च गजगा गायिकागति ।
गणेवेत्री च गन्धवती गन्धप्रिया गरनाशिनी ॥ ४८ ॥

गणाम्बा धनरूपा च गिरीशा गहनागमा ।
गुणानाञ्चनिधि गुर्वी गजराजोपरिस्थिता ॥ ४९ ॥

घोररूपा घोरघोषा घोरदानवघातिनी ।
धर्मदा घनदा घोरा घूर्णा घुघुरनादिनी ॥ ५० ॥

घृणिमन्त्रमयी धनध्वनि घृताची घनवाहना ।
घनछाया घनवेगा घृणिसन्तोषकारिणी ॥ ५१ ॥

चण्डिका चटुला चित्रा चर्चा सा चारुहासिनी ।
चर्चिता चातुरी चिल्ला चित्रमाल्यविभूषिता ॥ ५२॥

चन्द्रानना चारूदती चञ्चला चारुचन्द्रिका ।
चूलिका चित्रवस्त्रान्ता चन्द्रहासा चर्तुभुजा ॥ ५३॥

चकोरनयना चन्द्राभा चञ्चन्ती चिरचन्द्रिका ।
चकोरी चन्द्रचूडा च चिक्कना चूर्णकुन्तला ॥ ५४॥

चौरनाशकरीदेवी चारूमध्या चरूप्रिया ।
चिदानन्दा चारूगति चतुर्वक्रमनोहरा ॥ ५५॥

चन्द्रमण्डलमध्यस्था चन्द्रमण्डलवासिनी ।
चारूचन्दनलिप्ताङ्गी चतुरङ्गबलेश्वरी ॥ ५६॥

चक्रवाकध्वनिश्चैव चक्रहस्ता चतुर्मुखी ।
चतुर्दशी सुचित्रा च चक्रकोण निवासिनी ॥ ५७॥

चर्मण्वती चन्द्रभागा विचित्रा चण्डविक्रमा ।
चन्द्रकान्ति चोदयन्ती चण्डमुण्डवधोद्धरा ॥ ५८॥

चैतन्यादिसमाराध्या चैतन्यकुसुमप्रिया ।
चतुर्वर्णमयीमूर्तिः चर्तुवर्णप्रपूजिता ॥ ५९॥

चक्राङ्गधारिणी चन्द्रा चारूचन्द्रकलाधरा ।
चिदग्निकुण्डसम्भूता चतुर्वर्गफलप्रदा ॥ ६०॥

चतुःसमुद्ररशना चित्रमायाऽऽचिता चितिः ।
चराचरगजन्नाथा चक्रराजनिकेतना ॥ ६१॥

चिच्छक्तिश्चेतनारूपा चन्दना चरूतर्पिता ।
चन्द्रानना चन्द्रनिभा चिरण्टी चपला तथा ॥ ६२॥

ध्यानम् (४०१-) -
शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी ।
त्वमात्मा त्वं दीक्षा त्वमयमणिमादिगुणगणः ॥

अविद्या त्वं विद्या त्वमसि निखलं त्वं किमपरम् ।
पृथकतत्वं त्वत्तों भगवति न वीक्षामह इमे ॥

छन्दःसारा च छत्रेशी सुछत्राच्छादने रता ।

छायाछत्रधरादेवी छत्रछायाकृतालया ॥ ६३॥

जगज्जीवा जगद्बीजा जगतामुपकारिणी ।
जगद्गर्भा जगन्माता जगत्त्रयहितैषिणी ॥ ६४॥

जयश्री जयमाला च ज्येष्ठा ज्वालामुखी जया ।
ज्वालिनी च बृहज्ज्वाला ज्योतिरूपा जिनेश्वरी ॥ ६५॥

जाया जरायुणी जीवा जनयित्री जितेन्द्रिया ।
जागृतिश्चैव ज्योत्सना जीर्णवस्त्रा जरायुता ॥ ६६॥

जालन्धरधरादेवी जिनेन्द्रा जातरूपिणी ।
जिह्वा च जानकी जेत्री साजन्मा जातिभेदिनी ॥ ६७॥

जगन्मयी च जटिला जरामरणवर्जिता ।
जगतप्रिया जगद्धात्री जलधारा जगतधरा ॥ ६८॥

जगती जन्हूतनया जपलग्ना जपप्रिया ।
जलदाजितक्रान्तिश्चर्ज्वलन्ती ज्वरदेवता ॥ ६९॥

जितक्रोधा जितामित्रा जप्या जयवादिनी ।
जन्ममृत्यु-जरोत्तीर्णा जपापुष्पनिभाकृति ॥ ७०॥

तपोनिष्ठा तपोयुक्ता तापसी च तपः प्रिया ।
तीर्थस्थानप्रिया तीर्था सत्तीर्थफलदायिनी ॥ ७१॥

तन्द्रा तन्वी तपःसिद्धि तपसांसिद्धिदायिनी ।
तपस्विनी च तरूणी तारिणी च तिलोत्तमा ॥ ७२॥

तुरीया तर्कविद्या सा तुष्टिदा पुष्टिदाऽक्षया ।
तोतुला सा तपस्तुष्टा तृप्तिस्तेजस्वरूपिणी ॥ ७३॥

तरुणादित्यपटली तत्वमर्थस्वरूपिणी ।
तत्वाधिका तत्वमयी तेजःपुञ्जा च तैजसी ॥ ७४॥

तत्वासना तत्वरूपा तपसैवतमोपहा ।
तनुमध्या तपस्तथ्या तारा तत्पदलक्षिता ॥ ७५॥

तामसी च तमोयुक्ता तारामण्डलशोभिता ।
त्रिपुराभैरवीशक्ति सा त्रिनेत्रा त्रिपदाश्रया ॥ ७६॥

त्रिपुरासुन्दरीत्र्यक्षा त्रिशूलवरधारिणी ।
त्रिपुष्करा च त्रिपुरा त्रिवर्गत्राणतत्परा ॥ ७७॥

ध्यानम् (५०१-) -
पिता माता भ्राता सुहृदऽनुचरः सद्मगृहिणी ।
वपुः पुत्रो मित्रं धनमपि यदा मां विजहति ॥

तदा मेभिन्दाना सपन्दि् भयमाहान्धतमसां
महाज्योत्सने! मातर्भव करूणयासन्निधिकरी ॥

त्रिकालज्ञा त्रिलिङगा च त्रिबीजा त्रिदशेश्वरी ।
त्रिमुर्तिस्त्रिगुणातीता त्रयी त्रिभुवनेश्वरी ॥ ७८॥

दात्ती दयाकरी दक्षा दक्षजा दक्षपूजिता ।
दक्षिणा दण्डनीतिश्च दयारम्भा दयावती ॥ ७९॥

दान्ता च दक्षिणामूर्ति दीक्षा दीप्ता च दुर्गमा ।
सुदुर्गतिहरा दुर्गा सुदुर्गापन्निवारिणी ॥ ८०॥

दिवागर्तिदयामूर्तिः दीर्घनिद्रा च देविका ।
दीर्घागां दीर्घकेशी च देशभाषा दयावती ॥ ८१॥

दुष्टदानवसंहत्री दुष्टम्लेच्छविनाशिनी ।
दोलाक्रीडारतिःश्यामा दीप्तपावकसन्निभा ॥ ८२॥

दोला च द्वारिका दीप्ता दुःखदुःस्वप्ननाशिनी ।
दुर्गस्था दुगहन्त्री च दुर्लभा दक्षवन्दिता ॥ ८३॥

धनदा धृतिदा धारा धर्मदा ध्यानशालिनी ।
धान्यदात्री ध्यानवती धनधान्यविवर्धिनी ॥ ८४॥

धर्माधर्मसमुत्तीर्णा धर्मराजवरप्रदा ।
धरणिधरा च धन्या च सुधीरा धर्मवादिनी ॥ ८५॥

धर्मक्षेत्रस्थिता धर्मया धर्मकार्यसमन्विता ।
धराधरसुता ध्याता धनसम्पत्तिदायिनी ॥ ८६॥

नारायणी नित्यपूर्णा नृमान्या नृपनन्दिनी ।
नृपमान्या नृपैः सेव्या नृपवश्यकरी शिवा ॥ ८७॥

नरवाहनापरादेवी नन्दिनी नर्मदाशिवा ।

नारायणप्रियाधीरा नरमुण्डास्थिभूषणा ॥ ८८॥

नरेश्वरी च नवमी नवदुर्गागन्धारिणी ।
नागकन्या नागभूषा नरासृकपानमोदिनी ॥ ८९॥

नित्यनवा निराकारा निराधारा निरामया ।
नृत्यगीतप्रिया नारी नूतना नववल्लभा ॥ ९०॥

निधानं नगरेशानी निधिरूपा निधिरूपा निराश्रया ।
निर्विशेषा च निर्मुण्डा निर्विकारा निरञ्जना ॥ ९१॥

ध्यानम् (६०१-) -
विधे विध्ये वेद्ये विविधसमये वेदजननिः
विचित्रे विश्वाद्ये विनयसुलभे वेदगुलिके ।
शिवाज्ञे शीलस्थे शिवपदवान्ये शिवनिद्ये
शिवे मातृमद्रय त्वयि वितर भक्तिं निरूपमाम् ।
निरालम्बा नित्यतृप्ता नित्ययौवनशालिनी ।
नित्यं निर्गुणाकारा नित्यशान्ति परायणा ॥ ९२॥

निराबाधा च निर्लोभा निराशानाशिनी शिवा ।
नित्यानन्दकरी नित्यं निर्विशेषा च निर्मला ॥ ९३॥

निरामयकरी देवी निर्भया नित्यशोभना ।
नित्यसुपूजिता नित्या नित्यकल्याणकारिणी ॥ ९४॥

नारसिंही नीलवर्णा नीरोगा नलकुबरी ।
निष्ठा च निरहङ्करा निर्मोहा निखिलेश्वरी ॥ ९५॥

निर्वाणरूपा नित्यमुक्ता नित्यबुद्धि निरन्तरा ।
नित्यबुद्धिप्रदादेवी सा सर्वकर्मसाक्षिणी ॥ ९६॥

पार्वती पद्महस्ता च पद्मपाद पद्मलोचना ।
पद्मासनस्थितादेवी पद्मपुष्पैः सुपूजिता ॥ ९७॥

पञ्चमी पुण्यदा पुण्या पुण्यश्रवणकीर्तिता ।
पाशहस्ता पद्मनाभा पुण्यापुण्यफलप्रदा ॥ ९८॥

परमाया पराकाष्ठा परधामनिवासिनी ।
परानन्दा परप्रज्ञा पताका पञ्चमीप्रिया ॥ ९९॥

प्रज्ञा प्रभावती प्रीतिः प्राणापानस्वरूपिनी ।
प्राणदा प्राणपुष्टिश्च प्रीतिदा प्राणरूपिणी ॥ १००॥

बलिनी बुद्धिदा बुद्धि बहुनेत्रा पराशिवा ।
ब्रह्मानन्दप्रदा ब्राह्मी बृहती ब्रह्मरूपिणी ॥ १०१॥

बालिका बन्धुरूपा च बालक्रीडासनातनी ।
बहुश्रुता बृहद्रूपा बन्धूककुसुमप्रिया ॥ १०२॥

बुद्धमाता च बृहद्बुद्धि बलिमाया बलप्रदा ।
अन्धुबन्दिआस्तुताकार्?? बलवत्यैकनायिका ॥ १०३॥

बलिपूज्या बृहत्सेना ब्रह्मानन्दा बृहद्बला ।
बहिर्मुखै दुर्लभा च ब्रह्मात्मैकस्यसाक्षिणी ॥ १०४॥

भूतभव्या भविष्या च भक्तवात्सल्यशालिनी ।
भोगदा भक्तिगम्या भाः भूतभावविभाविनी ॥ १०५॥

भूतभीतिहरा भीमा भूतावेशविनाशिनी ।
भक्तेभ्यःसिद्धिदाऽभ्रान्ता भवरोगविनाशिनी ॥ १०६॥

ध्यानम् (७०१-) -
कलां प्रज्ञां आधां समयं अनुभूति समरसा
गुरू पारम्पर्य विनयमुपदेश शिवकथाम् ।
प्रणाम निर्वाण परममतिभूतिं परगुहां
विधि विधामाहुः सकलजननीमेव मुनयः ॥

भूतात्मा भोगिनी भद्रा भद्रदा भद्ररूपिणी ।
भक्तसौभाग्यदाऽभीरू भ्रामरी च भयापहा ॥ १०७॥

भयहाऽभयदा भीमा भवारण्यकुठारिका ।
सुभगा भोगदा भोग्यासहस्रभग भोगिनी ॥ १०८॥

महामाया महाविद्या महादेवी महामतिः ।
महाराज्ञी महासिद्धि महावीर्या महाभुजा ॥ १०९॥

महामन्त्रा महाशक्ति मतङ्गमुनिपूजिता ।
महाबला महामाना महाभयविनाशिनी ॥ ११०॥

महामाया महालक्ष्मी महाभैरवन्दिता ।

महापातकसंर्हत्री महाभैरवपूजिता ॥ १११॥

मायावती ह्यप्रमेया महासङ्कटनाशिनी ।
महाह्रदा महागर्त्ता महात्रिपुरसुन्दरी ॥ ११२॥

महास्मृति महामेधा महोघोपराक्रमा ।
महानिद्रा महामोहा मूलाधारनिवासिनी ॥ ११३॥

महादुर्गा महोत्साहा महाबीजा महारवा ।
महामुद्रा महाबलि महाशत्रुविनाशिनी ॥ ११४॥

मनुविद्या मृगीमध्या मृगत्वच मृगलोचना ।
मुण्डहस्ता महाकाली मुक्ताहारविभूषणा ॥ ११५॥

महासाम्राज्यदा शान्ता मुक्तानाम्परमगतिः ।
महायोगेश्वरी माया महिषासुरघातिनी ॥ ११६॥

मूलाधारा मृडाणी च मूलविग्रहरूपिणी ।
मोक्षदा महिषी मैत्री मातृमण्डलवासिनी ॥ ११७॥

महाकैलासनिलया च मुकुन्दा च मनोहरा ।
महाकामेशमहिषी च महायोगक्रमोज्ज्वला ॥ ११८॥

महेश्वरी महाकल्पा महान्ताण्डवसाक्षिणी ।
मनुमाता महातन्त्रा मलयाचलवासिनी ॥ ११९॥

महारूपा महापुष्पा महाभोगा महोत्सवा ।
मनोबुद्धि महायन्त्रा महाकीर्ति महोज्ज्वला ॥ १२०॥

मधुप्रीता मधुस्फीता मनोवाचामगोचरा ।
मनोमयी महादीक्षा माधवी मदनाशिनी ॥ १२१॥

ध्यानम् (८०१-) -
त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं
त्वं चेतनासि पुरूषे पवने बलं त्वम् ।
त्वं स्वादतासि सलिले शिखिनि त्वमूष्मा
निः सारमेव निखिलं त्वदृते यदि स्यात् ॥

महती मेरूनिलया मन्दारकुसुमप्रिया ।
मन्त्राणामशब्दसद्रूपा महामन्त्रस्वरूपिणी ॥ १२२॥

यशोरूपा यशोवती यशः प्रीर्तियशोधरा ।
योगिनी योगमाया च योगज्ञा योगिपूजिता ॥ १२३॥

यज्ञप्रिया यज्ञविद्या यज्ञविद्याप्रचारिणी ।
यज्ञफलप्रदादेवी यजमानस्वरूपिणी ॥ १२४॥

योगयुक्ता योगगम्या याजिनी याजकप्रिया ।
यत्तत्पदानुबन्धा च योगनिद्रा यशस्विनी ॥ १२५॥

रक्तदन्ता रक्तवर्णा रक्तपुष्पावतंसिनी ।
राजराजेश्वरी राज्ञी रमणी राजवल्लभा ॥ १२६॥

राजश्री राजरमणी राजमातास्वरूपिणी ।
राकेन्द्रवदना रम्या रक्ताम्बरा रतिः ॥ १२७॥

लक्ष्मीः सा ललितादेवी लोलाक्षी लोलकुन्तला ।
लोकेशी लोकसेव्या च लोकवश्यकरी सदा ॥ १२८॥

लेखिका चैव लेख्या लेखनी लेखकप्रिया ।
लध्यप्राप्ति सुलथ्या च लोकवश्यविभाविनी ॥ १२९॥

वेदमाता च वेदज्ञा वेदविद्याप्रदायिनी ।
वीरप्रिया वीरेशी वीरसू-वीरनन्दिनी ॥ १३०॥

वीरभूरविष्णुमाया च विमलानन्दवर्धिनी ।
वाग्वादिनी सुविजया विन्ध्याचलनिवाहिनी ॥ १३१॥

वामाचारप्रियादेवी वरशस्त्रास्त्रधारिणी ।
वामेश्वरी वीरेशी वीरभद्रा विशारदा ॥ १३२॥

विशाला विश्वमाला च विश्वेशी विश्वव्यापिनी ।
वैद्या वैद्यचिकित्साच विश्वकर्माविभाविनी ॥ १३३॥

विशालाक्षी सुनयना वैष्णवी स विशालहृत ।
वरशीला च वरदा वृन्दावननिवासिनी ॥ १३४॥

शक्तिः शक्तिधरादेवी शक्तियुक शक्तिदायिनी ।
शुभदा शुभकर्त्री च शुभलाभप्रदायिनी ॥ १३५॥

शरभा शुभाननादेवी शूलिनी च शुभाशया ।
शैवधि शरहस्ता च षोणा शाकम्चरी शिवा ॥ १३६॥

ध्यानम् (९०१-) -
त्वां व्यापिनीति समना इति कुण्डलीति
त्वां कामनीति कमलेति कलावतीति ।
त्वां मालिनीति ललितेत्यपराजितेति
देवि स्तुवन्ति विजयेति जयेत्युमेति ॥

श्मशाननिलयात्रयक्षा महाश्मशानसुन्दरी ।
शाङ्करी भैरवी श्यामा शङ्करार्धशरीरिणी ॥ १३७॥

शिवाकान्ता शिवसक्ता शिवपत्नी शिवप्रिया ।
शिवदूती शिवानन्दा शिवाराध्या शिवास्वयम् ॥ १३८॥

शारिका शिवरात्री च शुभ्राभा शुभलक्षणा ।
शाम्भवी शश्वतः शान्ता शीतला शोकनाशिनी ॥ १३९॥

शिशूत्सङ्गधरादोला शरत्कुमुदलोचना ।
श्वेतरूपा शुभ्रवस्त्रा शशिवर्णा शतनाम्ना ॥ १४०॥

सुलभा श्यामलाङ्गी शक्ति शोभना शुकभाषणा ।
शिशूप्रिया शर्वरी सा शिवज्ञानप्रदायिनी ॥ १४१॥

षटचक्रस्था च षटकोणा षणमार्गा षोडशीकला ।
षटचक्रभदिनी शक्तिः षटचक्रक्रमवासिनी ॥ १४२॥

सरस्वती च सर्वेशी सर्वशक्तिमयी प्रभा ।
सावित्री च सहस्राक्षी त्रिसन्ध्या सा सदातुष्टा ॥ १४३॥

सत्यज्ञानवती सौम्या सामगानप्रिया सती ।
सहस्रदलपद्मस्था सर्वापत्तिनिवारिणी ॥ १४४॥

सर्वाबाधाप्रशमनी सर्वरोगविनाशिनी ।
सर्वदेवमयीशक्ति सर्वशत्रुभयप्रदा ॥ १४५॥

सर्वदुःखहराशिवा सर्वशापनिवारिणी ।
सर्वपापहरीहृष्टा सर्वकष्टनिवारिणी ॥ १४६॥

स्वर्गपवर्गदादवी सर्वसम्पतिदायिनी ।
सर्वकामेषु सिद्धार्थी सर्वैश्वर्य सर्वदा ॥ १४७॥

सहस्रनाम्नी सर्वेशी सर्वशक्तिमयी शिवा ।
सूर्यकान्तनिभा शुभ्रा सिद्धविद्या सनातनी ॥ १४८॥

सद्गतिःश्चैव सत्कीर्ति सत्यमार्गप्रकाशिनी ।
सुशीला सौभाग्यवती श्यामा सा सिन्दूरतिलकप्रिया ॥ १४९॥

स्वंयभू च सुरूपा च सेवाफलविवर्धिनी ।
सुखदा स्वयमानन्दा स्वयमानन्ददायिनी ॥ १५०॥

हरिप्रिया च हंसस्थाहंसोज्ज्वल शिरोरूहा ।
क्षमा क्षमाकरी देवी क्षान्तिः कैवल्यदायिनी ॥ १५१॥

ज्ञानदा चैव ज्ञानेशी ज्ञानशक्ति समन्विता ।
ज्ञानिनां ज्ञानरूपा च ज्ञानमुद्रा च ज्ञाविनी ॥ १५२॥

इति उमासहस्रनामस्तोत्रं सम्पूर्णम् ।

## पूर्णाहुति

ॐ ह्रीं श्रीं हुँ उमा भगवत्यै स्वाहा ।
अन्नपुर्णे सदापुर्णे शङ्करप्राणवल्लभे ।
ज्ञान वैराग्य सिद्धार्थ भिक्षां देहि च पार्वति ॥

माता-सयाद उमादेवी पितादेवो महेश्वरः
बान्धवा शिवभक्तश्च स्वदेशो भुवनत्रयम् ।
उमासहस्रनामक स्तोत्र स्वयमानन्द भाषितं
भोगमोक्षप्रदं पुण्यं सर्वकष्टनिवारकं
कल्याणदं सुमधुरं सर्वसम्पत्तिकारकं
श्रव्यं गेयं शिवं श्रेष्ठ सर्वकामफलप्रदं
सुभोगमोक्षं दिव्यं शिव भक्तमनोरमं
यः पठेद् भक्तिनो नित्यं तस्मिन माता प्रसीदति ॥

इति उमासहस्रनामस्तोत्रं सम्पूर्णम् ।

## पूर्णाहुति

ॐ ह्रीं श्रीं हुँ उमा भगवत्यै स्वाहा ।

अन्नपूर्णेसदा पूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥

माता स्याद उमा देवी पिता देवो महेश्वर ।
बान्धवा शिवभक्तश्च स्वदेशो भुवनत्रयम ॥

उमा सहस्रनामकं स्तोत्रं स्वयमानन्दभाषितम् ।
भोगमोक्षप्रद् पुण्यं सर्वकष्टनिवारकम् ॥

कल्याणदं सुमधुरं सर्वसम्पत्तिकारकम् ।
श्रण्यं गेयं शिवं श्रेष्ठं सर्वकामफलप्रदम् ॥

सुभोगमोक्षदं दिव्यं शिवं भक्तमनोरमम् ।
यः पठेद्भक्तिनो नित्यं तस्मिन् माता प्रसीदति ॥

## उमाष्टकम्

चामरं दक्षिणो हस्ते कमलं चोत्तरे तथा ।
रक्ताम्बरा दया मूर्तिः प्रसन्नोमास्तु सर्वदा ॥ १॥

सुवर्णसदृशी गौरी भुजद्वयसमन्विताम् ।
नीलपद्म हि वामेन पाणिना विभ्रतीं सदा ॥ २॥

दिवाकरशतद्युतिं जननीं भुक्तिमुक्तिदाम ।
सुमुखीं वरदां देवी सिंहस्था परिपूजयेता ॥ ३॥

भक्ताय शिवरामाय स्नुषा ब्राहस्य सन्निधौ ।
स्वप्ने स्वं दर्शयामास रूपं वैराग्यदं शुभम ॥ ४॥

काकरूपा ततो देवी भक्तानुग्रहकाम्यया
ओङ्काररूप तां याता पञ्चधाऽभयदायिनी ॥ ५॥

प्रादुर्भूता नदी रूपा भक्तानां फलदायिनी ।
ओङ्काररूपा पञ्चधा दिव्य कुण्डजा फलदायिनी ॥ ६॥

भक्तः प्रभावयुक्तायाः स्वयमानन्दनामकः ।
देव्या भवननिर्मातुः शिलान्यासं चकार सः ॥ ७॥

ओङ्कार रूपेणा विराजमानासा पूजकानां वरदायिनी च ।
रक्ताम्बरा दिव्यवपुः उमाख्या सा बह्मरूपा विजयस्य दात्री ॥ ८॥

## श्री उमा देवी जी की आरती

जगजननी जय! जय! मां (जगजननी जय ! जय ! जय ! )
भयहारिणि, भवतारिणि, भवभामिनि जय! जय! जय!
तू ही सत-चित सुखदाय शुद्धब्रह्मरूपा ।
सत्य सनातन सुन्दर पर-विश्व सूर भूपा ॥ १॥ जग. ॥

आदि अनादि अनामय अविचल अविनाशी
अमल अनन्त अगोचर अज आनन्दराशी ॥ २॥ जग. ॥

अविकारी अहगारी अकल कलाधारी
कर्ता विधि भर्त्ता हरि हर संहारकारी ॥ ३॥ जग. ॥

तू विधिवधू रमा तू उमा महामाया ।
मूल प्रकृति विद्या तू तू जननी जाया ॥ ४॥ जग. ॥

रामकृष्ण तू, सीता ब्रजरानी राधा
तू वाञ्छाकल्पद्रुम हारिणि सब बाधा ॥ ५॥ जग. ॥

दशविद्या, नवदुर्गा, नानाशस्त्रकरा ।
अष्टमातृका योगिनि, नव नव रूप धरा ॥ ६॥ जग. ॥

तू परधामनिवासिनि महाविलासिनितू ।
तू ही श्मशानविहारिणि, ताण्डवलासिनि तू ॥ ७॥ जग. ॥

सुस्मुनि-मोहिनि सौम्या तू शोभाऽऽधारा ।
विवसन विकट-सरूपा प्रलयमयी धारा ॥ ८॥

तू ही स्नेह सुधामयि तू अति गरल मना ।
रत्नविभूषित तू ही तू ही अस्थि तना ॥ ९॥ जग. ॥

मूलाधारनिवासिनी इह-पर-सिद्धिप्रदे ।
कालातीता काली, कमला तू वर दे ॥ १०॥ जग. ॥

शक्ति शक्तिधर तू ही नित्य अभेदमयी ।
भेदप्रदर्शिनि वाणी विमले! वेदत्रयी ॥ ११॥ जग. ॥

हम अति दीन दुःखी मा! विपुल जाल घेरे ।

है कपूत अति कपटी पर बालक तेरे ॥ १२॥ जग. ॥

निज स्वभाववश जननी ! दया दृष्टि कीजै ।
करुणा कर करुणामयी! चरण-शरण दीजै ॥ १३॥ जग. ॥

## देवी मयी

तव च का किल न स्तुतिरम्बिके !
सकलशब्दमयी किल ते तनुः
निखिमूर्तिषु में भवदन्वयो
मनसिजासु बहिः प्रसारासु च इति विचिन्त्य शिवे !
शमिताशिवे ।
जगति जातमययत्रवशादितं स्तुतिजपार्चनचिन्तनवर्जिता
न खलु काचन काल कलास्ति मे ॥

महामेश्वर आचार्य अभिनवगुप्त ।

## क्षमाप्रार्थना

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ १॥

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥ २॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मयादेवि परिपूर्णतदस्तुमे ॥ ३॥

अपराधशतं कृत्वा जगदम्बेतिचोच्चरेत् ।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ ४॥

सापराधोऽस्मिशरणं प्राप्तस्त्वां जगदम्बिके ।
इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु ॥ ५॥

अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीदपरमेश्वरि ॥ ६॥

कामेश्वरिजगन्मातः सच्चिदानन्दविग्रहे ।

गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥ ७॥

गुह्यातिगुह्यगोत्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतुमेदेवि त्वत्प्रसादान्महेश्वरि ॥ ८॥

इति क्षमाप्रार्थना सम्पूर्णा ।
श्री उमार्पणमस्तु ॥

From the author
ॐ उत्तिष्ठत जागृत प्राप्य वरान्निबोधत ।
ॐ नमः उमा भगवत्यै ।
महामाया माता उमा देवी की अपार कृपा का सौभाग्य मुझे शिशु अवस्था मे ही प्राप्त हुआ उन्ही के अनुग्रह से मैं उनके दिव्यदर्शन का पात्र बन सका माता के आदेश तथा इच्छानुसार मैं उसके दिव्य तथा आकर्षक मन्दिर का निर्माण करने का सौभाग्य प्राप्त कर सका ।

उमा सहस्रनाम के निर्माण की इच्छा मन में जागी तो अपनी प्रिय शिष्या श्रीमती कृष्णा कौल को आदेश दिया माता उमादेवी के चमत्कारों, प्रशंसा, साधनाओं, महिमा तथा गुणों से इसको अवगत किया और इसने इन्हीं साधनाओं आदि को शब्दों का रूप दिया और “उमासहस्रनां स्तोत्र” का निर्माण हुआ मैं पण्डित बलजिन्नाथ जी का अत्यन्त आभारी हूं जिन्होनें इस स्तोत्र का व्याकरण तथा छन्द शास्त्र की दृष्टि से संस्कार किया । उमा सहस्रनाम स्तोत्र अत्यन्त मनमोहक, प्रभावशाली, लाभदायक तथा सन्तोषजनक है जो कोई इस स्तोत्र का एकाग्रचित होकर नित्यनियमानुसार पाठ, श्रवण, कीर्तन या होम करेगा उसकी सारी अभिलाषायें सिद्ध होगी । भक्तिपूर्वक श्रद्धा से जो कोई इसका पाठ करेगा उनकी सारी आपदायें दूर होगी तथा पाप नष्ट होङ्गीम् । समस्त हिन्दू जाति के लिए यह स्तोत्र कल्याणकारी सिद्ध हो यह मेरी मंगल कामना हैम् । उमा देवी को मेरा शतशः प्रणाम ।

रचयिता - स्वामी स्वयमानन्दजी

Proofread by Rajesh Thyagarajan

pdf was typeset on June 6, 2025

Please send corrections to *sanskrit@cheerful.com*